# वेदेषु आयुर्विज्ञानचिन्तनम्

**Surendra Pal Singh**

C.M.P. Degree College, Allahabad

***Abstract***

*Vedas are the most ancient source of different streams of knowledge that includes the knowledge of physiology, different diseases, their causes and symptoms and their curing methods as well. One can find the oldest possible records of the investigating agencies of human body, its illness and treatment which embodies the description of medicinal values and uses of different plants, various surgical instruments, proper uses of water, food, grains etc. This paper is an attempt to evaluate this reservoir of ancient knowledge of medical sciences.*

वेदे सम्पूर्णज्ञानं प्रतिष्ठितम्। तत्र न केवलं 'ज्योतिष्टोमेन स्वर्गकामो यजेत' कथितम् अपितु दुःखत्रयं दूरीकर्त्तुम् उपायाः अपि उक्ताः। वस्तुतः 'शरीरमाद्यं खलु धर्मसाधनम्' अर्थात् स्वस्थशरीरेणैव सम्पूर्णकार्यकलापाः विधातुं शक्याः अतएव 'कुर्वन्नेवह कर्माणि जिजिविषेच्छतं समाः' इति ऋषिभिः चिन्तितम्। अतः आयुर्विज्ञानस्य आदिस्रोतः वेदः एव।

आयुर्विज्ञानशब्दे प्रयुक्तस्य आयुश्शब्दस्य अर्थः जीवनमेव 'आयुः जीवितमुच्यते'[१] स्वस्थ-दीर्घजीवनस्य परिणामेनैव मानवजीवनं सार्थकम्। न केवलं मनुष्याणाम् अपितु पलकाप्य-शालिहोत्र-इत्यादीनां रचनाद्वारा गज-अश्व-आदीनां सर्वेषामुपकारः ऋषिभिः कृतः।[२] अतः आयुर्वेदः विविधशाखायुक्तचिकित्साविज्ञानमेव केवलं न अपितु पशु-पक्षि-वृक्षादिसम्बद्धचिकित्साविज्ञानमस्ति 'आयुर्वेदशब्दोऽयं ... किन्तु हस्ति-अश्व-गवादीनां पशुपक्षिणां वृक्षलतादीनाम् उद्भिज्जादीनामपि भेषज्यानि सङ्गृह्णाति।'[३] एकत्र ऋषिणा उक्तं- 'या ओषधी पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च'।[४] अर्थात् याः ओषधयः देवेभ्यः पुरा उत्पन्नाः ताः सर्वाः सप्तोत्तरशतस्थानेषु निश्चयेन विद्यन्ते। अतएव अनुमन्यते यत् ओषधयः सर्वप्रथमम् उत्पन्नाः। मोहनजोदडो नामस्थानस्य उत्खनने एकः कृष्णवर्णीयः गोलकः प्राप्तः यः रसायनशास्त्राचार्यैः 'शिलाजित्' रूपेण स्वीक्रियते।[५]

ऋग्वेदस्य औषधिसूक्तन्तु (१०/९७) आयुर्विज्ञानं आयुर्वेदं वा उपवेदरूपेण अवधारयति। तदतिरिक्तम् अनेकैः उल्लेखैः आयुर्विज्ञानवर्णनं दृश्यते। यथा रसायनप्रयोगेण च्यवन-ऋषेः पुनर्यौवनप्राप्तिः,[६] ऋषिदीर्घतमसः हृदयस्य शिरसश्च शल्यचिकित्सया पुनस्सन्धानं, खेलनेरशस्य पत्न्याः कर्तितस्य पादस्य स्थाने लौहनिर्मितपादसंयोजनम्,[७] अश्विनीकुमाराभ्यां दधीचेः शिरश्छेदनं तत्स्थाने अश्वशिरस्स्थापनं,[८] श्यावश्वस्य विच्छिन्नानङ्गान् योजयित्वा पुनरुज्जीवनं,[९] ऋजाश्वाय दृष्टिदानं,[१०] वृद्धत्वे सत्यपि घोषायाः वृद्धत्वमोक्षः पतिप्राप्तिश्च, अपालायाः चर्मरोगमुक्तिः[११] च इत्यादिभ्यः आख्यानेभ्यः व्यतिरित्तं नैकविधानां सर्पविषहर-ओषधीनां वर्णनमस्ति।[१२]

सूर्यचिकित्सया हृदयरोगस्य हरिमारोगस्य च निवारणं,[१३] जलस्य ओषधिरूपेण स्वीकृतिः,[१४] यक्ष्मा-राजयक्ष्मयोः निवारणार्थम् ओषधिवर्णनमित्यादयः[१५] महत्त्वपूर्णदृष्टन्ताः। ऋग्वेदे रुद्रः देवभिषग्-रूपेण स्वीकृतः।[१६] विविधस्थलेषु अश्विनीकुमाराभ्यां शल्य-काय-रसायन-आदिरूपेण अष्टाङ्ग-आयुर्वेदेन रोगमुक्तिवर्णनमस्ति। अथर्ववेदे आयुर्वेदस्य उल्लेखः स्वतन्त्ररूपेण प्राप्यते। चिकित्सापद्धतिः चतुर्धा विभक्तास्ति- आथर्वणी, आङ्गिरसी, दैवी मानुषी च।

आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत।
ओषधयः प्रजायन्ते यदा त्वं प्राणं जिन्वसि।।[१७]

सुश्रुतसंहिता आयुर्वेदम् अथर्ववेदस्य उपाङ्गं कथयति।[१८]

ऐतरेयब्राह्मणे उल्लिखितोऽस्ति यत् ओषधिद्वारा रोगोपचारः क्रियते।[१९] गोपथब्राह्मणानुसारं रोगाः प्रायः ऋतु-सन्धिकाले भवन्ति।[२०] तैत्तिरीयोपनिषदि अन्नब्रह्म इत्यस्य सुन्दरं विवेचनमस्ति।[२१] छान्दोग्योपनिषदि अन्नपाचन-प्रक्रिया,[२२] हृदयस्य नाडीवर्णनं, पामारोगस्य[२३] कथनं च कृतम्। एवमेव बृहदारण्यकोपनिषदि नेत्रसंरचना, शापजन्यरोगोत्पत्तिश्च वर्णितास्सन्ति।[२४]

अष्टाङ्ग-आयुर्वेदस्य-शल्य-शालाक्य-काय-भूतिविद्या-कौमारभृत्य-अगद-रसायन-वाजीकरणानां पृथक् नामोल्लेखपूर्वकं वर्णनन्नास्ति किन्तु केनचिद्रूपेण एतत्सम्बद्धचिकित्सायाः वेदे

Vijnana Bharati

उल्लेखोऽस्ति। शल्यचिकित्साविषयक-उदाहरणानि यथा मूत्रघाते सति शलाकया मूत्रनिस्सारणम्,[२५] अयश्शलाकया अपची-भेदनं,[२६] प्रसवसमस्यासमाधानार्थं योनिभेदनम्।[२७] शलाक्यतन्त्रेण नेत्रमुखकर्णादीनां रोगाणाम् उपचारो भवति। नेत्ररोगेषु ऐलव-बभ्रु-निराल-आदीनाम् उल्लेखः अथर्ववेदे प्राप्यते। दन्तरोग-केशरोग-कर्णरोग-मुखरोगाणाम् उल्लेखः उपचारः च अथर्ववेदे प्राप्यते। ओषधिरूपेण नितत्नी-शमी-शतावरादीनां प्रयोगः वर्णितः। कायचिकित्सासम्बद्धरोगाणां तेषामुपचाराणां च अथर्ववेदः भाण्डारः एव। भूतविद्याया अत्यधिकवर्णनम् अथर्ववेदेऽस्ति यथा यातुधाननाशन-पिशाचक्षय-रक्षोघन-आदीनि।[२८] विषस्य ज्ञानं तेन उत्पन्नविकाराणां प्रशमनमेव अगदतन्त्रस्य विषयः। अथर्ववेदे विषेण विषस्य नाशनं वर्णितम्- 'चक्षुषा ते चक्षुर्हन्मि विषेण हन्मि ते विषम्।' एतदतिरिक्तम् अथर्ववेदे विविध-विषाणां तेषाम् उपचारः च वर्णितमस्ति।[२९]

ऋग्वेदे ऋषिच्यवनस्य पुनर्यौवनप्रप्तिः रसायनतन्त्रस्य एव आधारः। अथर्ववेदे निम्नलिखिताः रसायन-ओषधयः उक्ताः- अपामार्गः (सहस्रवीर्य), अरुन्धती (सहदेवी), अर्कः, उदुम्बरः, कपित्थः, कुष्ठः, जीवन्ती (गिलोय), जायमाणः, दर्भः (सहस्रवीर्यं) दूर्वा, न्यस्तिका (शङ्खपुष्पी), पिप्पली, पृश्नपर्णी, मण्डूकी, मधुक (यष्टिमधु), शतावरः शेपहर्षिणी, सोमादयः।[३०]

ऋग्वेदे वाजीकरणस्य आभासः प्रतीयते। तत्र उल्लिखितोऽस्ति यत् कामः एका मानसिकशक्तिः यः मनसः रेतः, सर्वप्रथमं हृदये स्पन्दते अतः प्रथमं कामः जातः -

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा।।

बृहदारण्यकोपनिषदि आनन्दस्य एकमात्रं स्थानं उपस्थः उक्तः 'सर्वेषामानन्दानामुपस्थ एकायनमेव'। वाजीकरणस्य अनेकसन्दर्भाः अथर्ववेदे उपलब्धाः। शेषहर्षिणी इन्द्रियशक्तिवर्धिका भवति।[३१] मणिधारणेनापि रोगनिवृत्तिः भवति स्म। यथा तलाशमणि-यवमणि-दर्भमणि-औदुम्बरमणि-शङ्खमणि-शूलमणि-आदीनाम् उल्लेखः अथर्ववेदेऽस्ति। आयुः-संरक्षण-सवर्धनार्थं प्राकृतिकचिकित्साया उल्लेखोऽपि वेदेषु प्राप्यते। पृथ्वी-जल-तेजस्-वायु- आकाश-तत्त्वानाम् सदुपयोगेन मनुष्यः आत्मानं स्थस्थं रक्षितुं शक्नोति।[३२]

अनेन प्रकारेण आयुर्वेदसम्बन्धिविवेचनेन प्रतीयते यत् वेदाः सर्वविद्यामूलानि। सर्वेषां विषयाणाम् उल्लेखः केनचिद् रूपेण वेदेषु अवश्यमेवास्ति। अतएव मोनियरविलियम्समहोदयेन स्वीक्रियते यत् हिन्दवः केवलं व्याकरणक्षेत्रे एव श्रेष्ठाः नासन् अपितु ज्योतिष-गणित-ओषधादीनाम् ज्ञानं बहुपूर्वमेव प्राप्तवन्तः यस्य संवर्धनं बहुकालानन्तरं पाश्चात्त्यैः कृतम्।

***सन्दर्भ :***


१. काश्यपसंहिता विमानस्थानं, शिष्योपक्रमणीयोध्यायः, १०
२. शालिहोत्रः सुश्रुताय ह्यायुर्वेदमुक्तवान्।
पालकाप्ययोङ्गराजाय गजायुर्वेदमब्रवीत्।। अग्निपुराणम् २९२
३. हेमराजशर्मा - काश्यपसंहिता, उपोद्घात, पृ. ३
४. ऋग्वेदः १० मण्डल, ९७ सूक्त, प्रथममन्त्रम्
५. हेमराजशर्मा -काश्यपसंहिता, उपोद्घात, (हिन्दी अनुवाद) पादटिप्पणी, पृ. ११३
६. ऋग्वेद १.११७.१३, १.११६.१०
७. तत्रैव १.११६.१५
८. तत्रैव १.११६.१२, १.११७.२२
९. तत्रैव १.११७.२४
१०. तत्रैव १.११६.१६, १.११७.१७
११. तवैव १.११७.७, ८.९१.७
१२. तत्रैव १.१९१.१-१६, अथर्ववेद ७.८८.१
१३. तत्रैव १.५०.११-१३
१४. तत्रैव १०.१३७.६, १.२३.१९, अथर्ववेद ५.१७.१-३
१५. तत्रैव १०.९७.१२-१३
१६. तत्रैव २.३३.४, अथर्ववेद ११/२
१७. अथर्ववेद ११.४.१६
१८. 'इह खलु आयुर्वेदमष्टाङ्गमुपाङ्गमर्थवेदस्य' सुश्रुतसंहिता १/९
१९. ऐतरेयब्राह्मण ३/४०, १.३.४
२०. गोपथब्राह्मण उत्तरभागे, तृतीयप्रपाठकः
२१. तैत्तिरीयोपनिषद्, ७ अनुवाक
२२. छान्दोग्योपनिषद्, ६/४
२३. तत्रैव ८/६, ४.१.८
२४. बृहदारण्यकोपनिषद् अध्याय-४
२५. अथर्ववेदः १.३/१-९
२६. तत्रैव ७/७४/१-२
२७. तत्रैव १/११/१-६
२८. अथर्ववेद १९.३९.१-१०, १/२८
२९. अथर्ववेद ६.१२.१-३, ७.५६.१-८
३०. तत्रैव ४/१७.१-८, ४.१९.१-८, ६.७२.१, १९.३१.१, ४.४.१, ८.२.६, १९.२८.१, ४.१८.१-८, ७.६७१-३, ८.७.१-२८, ७.५६.१-८, २.२५.१-४, ३.११.१-८, ६.१०९.१-३
३१. तत्रैव ४.४.१
३२. अथर्ववेदः प्रथमकाण्डम् , कौशिकगृह्यसूत्रम् २६/१६-१७